# चतुर्दशः पाठः

*पञ्चतन्त्रं नीतियुतानां सरल-सरस-सदुपदेशात्मिकानां कथानां संग्रहोऽस्ति। पञ्चतन्त्रस्य रचना पण्डित विष्णुशर्मणा सरलोपायेन नीतिज्ञानप्रदानाय कृता। स्वाद्भुत-भाषा-शैल्याः अयं ग्रन्थः विश्वस्मिन् जगति प्रसिद्धोऽस्ति। संसारस्य नैकासु भाषासु अस्यानुवादो लभ्यते।*

*पञ्चतन्त्रनामात्मकेऽस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति — १. मित्रभेदः २. मित्रसम्प्राप्तिः ३. काकोलूकीयम् ४. लब्धप्रणाशः ५. अपरीक्षित-कारकञ्चेति।*

*प्रस्तुतोऽयं पाठः पञ्चतन्त्रस्य चतुर्थतन्त्रस्य लब्धप्रणाशस्य प्रथमायाः कथायाः सारः वर्तते। अस्मिन् पाठे गङ्गदत्तनामकः मण्डूकः कदाचिद् स्वीयजनैः अपमानितः सन् प्रतिशोधभावनया तेषां प्रत्यपकाराय प्रियदर्शनं नाम सर्पं आह्वयति। सर्पश्च सर्वान् बन्धुवर्गान् भक्षयति। तत्रान्तरे सर्वेषां बन्धुवर्गाणां समाप्तौ सति सः सर्पः गङ्गदत्तस्य शिशूनपि भक्षयति। कथा सन्दिशति — यया दुष्टतया गङ्गदत्तेन स्वबान्धवाः हताः, तया एव तस्य पुत्राः अपि कालकवलिताः। उक्तं हि-''यो यद्वपति बीजं हि लभते तादृशं फलम्।''*

## यो यद्वपति बीजं हि लभते तादृशं फलम्

कस्मिंश्चिद् कूपे गङ्गदत्तो नाम मण्डूकः प्रतिवसति स्म। स कदाचिद् दायादैः उद्वेजितः अरघट्टघटीम् आरुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् ''कथं तेषां दायादानां मया प्रत्यपकारः कर्त्तव्यः ?'' एवं चिन्तयन् बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत् यत् ''एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करोमि।''

एवं विभाव्य बिलद्वारं गत्वा तम् आहूतवान् — एहि, एहि प्रियदर्शन, एहि! तच्छ्रुत्वा सर्पोऽचिन्तयत्- ''य एषः माम् आह्वयति, न स स्वजातीयः। यतो नैषा सर्पवाणी। तदत्रैव दुर्गे स्थितस्तावद् वेद्मि-कोऽयमिति ?'' आह च- 'भोः को भवान् ?' स आह-''भोः गङ्गदत्तो नाम मण्डूकाधिपतिः त्वत्सकाशे मैत्र्यर्थमभ्यागतः।'' तच्छ्रुत्वा सर्प आह- ''भो अश्रद्धेयमेतत् यत् तृणानां वह्निना सह संगमः।''

गङ्गदत्त आह-''भोः सत्यमेतत्। स्वभाववैरी त्वमस्माकं, परं परपरिभवात् प्राप्तोऽहं ते सकाशम्।'' सर्प आह-''कथय, कस्मात्ते परिभवः ?'' स आह-''दायादेभ्यः''। सोऽप्याह-''क्व ते आश्रयः, कूपे, तडागे, ह्रदे वा ? तत् कथय स्वाश्रयम्।'' तेनोक्तम्-''पाषाणचयनिबद्धे कूपे''। सर्प आह-''अपदा वयम्। तन्नास्ति मे तत्र प्रवेशः। प्रविष्टस्य च, स्थानं नास्ति, यत्र स्थितस्तव दायादान् व्यापादयामि। तद् गम्यताम्।''

गङ्गदत्त आह-''भोः समागच्छ त्वम्। अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि। तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति तत्र स्थितस्त्वं लीलया दायादान्-व्यापादयिष्यसि।''

तच्छ्रुत्वा सर्पो व्यचिन्तयत्–"अहं तावत् परिणतवयः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि। तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः। तद् गत्वा तान् मूषकान् भक्षयामि" इति।

एवं विचिन्त्य तमाह–"भो गङ्गदत्त! यद्येवं तदग्रे भव, येन तत्र गच्छावः।" गङ्गदत्त आह–"भोः प्रियदर्शन! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानं च दर्शयिष्यामि। परं त्वयाऽस्मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि, त एव भक्षणीयाः" इति। सर्प आह–"साम्प्रतं त्वं मे मित्रं जातम्। तन्न भेतव्यम्। तव वचनेन भक्षणीयास्ते दायादाः।" एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च, तेनैव सह प्रस्थितः।

अथ कूपम् आसाद्य अरघट्टघटिकामार्गेण सर्पस्तेन सह तस्यालयं गतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः। ते च तेन शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितम्– "भद्र, निःशेषितास्ते रिपवः। तत् प्रयच्छान्यन्मे किञ्चित् भोजनं यतोऽहं त्वयात्रानीतः।" गङ्गदत्त आह–'भद्र, कृतं त्वया मित्रकृत्यं, तत्साम्प्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम्' इति। सर्प आह–"भो गङ्गदत्त, न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि? मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामि" इति।

तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्–"अहो, किमेतन्मया कृतं सर्पमानयता? तद् यदि निषेधयिष्यामि तत् सर्वानपि भक्षयिष्यति।"

एवं चिन्तयतस्तस्य तेन सर्पेण शनैः शनैः सकलमपि मण्डूककुलं यथाकालं कवलितम्।

साध्विदमुच्यते– यो यद् वपति बीजं हि लभते तादृशं फलम्।

## शब्दार्थाः

**दायादैः** — स्ववंशीयजनैः (अपने कुटुम्बियों के द्वारा)। **उद्वेजितः** — क्षुब्धः (तंग किया गया)। **अरघट्टघटीम्** — अरहटडोलिकाम् (रहट में प्रयोग किया जाने वाला डोला)। **प्रत्यपकारः** — अपकारस्य प्रतिकारः (अपकार का बदला)। **उच्छेदम्** — विनाशम् (विनाश)। **विभाव्य** — विचार्य (विचार करके)। **वह्निना** — अग्निना (अग्नि का)। **सकाशम्** — निकटम् (निकट)। **परपरिभवात्** — परैः कृतापमानात्/तिरस्कारात् (दूसरे के द्वारा किये अपमान से)। **वाप्याम्** — (वापी में)। **कूपे** — (कुएँ में)। **तडागे** — (तालाब में)। **ह्रदे** — गभीरे जलाशये (गहरे जलाशय में)। **पाषाणचयनिबद्धे** — पाषाणखण्डैः निबद्धः (कूपः) तस्मिन् (पत्थरों के समूह से बने हुए में)। **अपदाः** — पदरहिताः (पैरों से हीन=सर्प)। **व्यापादयामि** — घातयामि (मारता हूँ)। **जलोपान्ते** — जलस्य निकटे (जल के पास)। **कोटरम्** — निष्कुहः (खोखल)। **परिणतवयाः** — वृद्धाः (परिणतं वयः यस्य असौ) (बूढ़ा)। **सुखावहः** — सुखकरः (सुखकारी)। **जीवनोपायं** — जीविकायाः उपायम् (जीविका का उपाय)। **कुलाङ्गारेण**– कुलस्य नाशकेन (कुलनाश के लिये अंगार के समान)। **अभिहितम्** — कथितम् (कहा)। **निःशेषिताः** — समाप्ताः (समाप्त कर दिये)। **रिपवः** — शत्रवः (शत्रु)। **स्ववर्गीयम्** — स्वपरिजनम् (कुटुम्बीजन को)। **व्याकुलमना** — व्यग्रमना (व्याकुल मन वाला)। **कवलितम्** — भक्षितम् (खा लिया)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. मण्डूकराजस्य नामासीत् —

(अ) गङ्गदत्तः (आ) भुजङ्गदत्तः

(इ) मण्डूकराजः (ई) प्रियदर्शनः ( )

२. मण्डूकराजः कैः उद्वेजितः —

(अ) सर्पैः (आ) खगैः

(इ) दायादैः (ई) पुत्रैः ( )

३. "अहं तावत् परिणतवयाः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि" इति कः अचिन्तयत् —

(अ) मूषकः (आ) मण्डूकः

(इ) चित्रग्रीवः (ई) सर्पः ( )

४. "यो यद्वपति बीजं हि लभते तादृशं फलम्" इति पाठः संकलितोऽस्ति —

(अ) हितोपदेशात् (आ) जातकमालातः

(इ) मित्रभेदात् (ई) लब्धप्रणाशात् ( )

**लघूत्तरात्मकप्रश्नाः**

१. प्रियदर्शनः कः आसीत्?

२. गङ्गदत्तस्य परिभवः कैः कृतः?

३. कूपे सर्पः कुत्र स्थितः?

४. गङ्गदत्तस्य आश्रयः क्व आसीत्?

५. सर्पः केन मार्गेण गङ्गदत्तस्यालयं गतः?

**निबन्धात्मक-प्रश्नाः**

१. दायादानां प्रत्यपकाराय गङ्गदत्तः किं कृतवान्?

२. बिलद्वारं प्राप्तं गङ्गदत्तं सर्पः किम् उक्तवान्?

३. कूपे नीयमानं सर्पं गङ्गदत्तः किम् उक्तवान्?

४. मण्डूकाभावे गङ्गदत्ताय सर्पेण किम् अभिहितम्?

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (अ) २. (इ) ३. (आ) ४. (ई)

**व्याकरणात्मक-प्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत —

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदा. | अस्ति | अस् | लट् | प्रथमः | एकवचनम् |
| | अपश्यत् | ....... | ....... | ....... | ....... |
| | करोमि | ...... | ....... | ....... | ....... |
| | वेद्मि | ...... | ....... | ....... | ....... |
| | व्यापादयामि | ...... | ....... | ....... | ....... |
| | अचिन्तयत् | ...... | ....... | ....... | ....... |
| | प्राप्नोमि | ...... | ....... | ....... | ....... |
| | भक्षयामि | ...... | ....... | ....... | ....... |
| | दर्शयिष्यामि | ...... | ....... | ....... | ....... |
| | गच्छामि | ...... | ....... | ....... | ....... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| उदा. | कूपे | कूप | सप्तमी | एकवचनम् |
| | माम् | ...... | ....... | ............. |
| | तेन | ...... | ....... | ............. |
| | दायादान् | ...... | ....... | ............. |
| | लीलया | ...... | ....... | ............. |
| | रिपवः | ...... | ....... | ............. |
| | त्वाम् | ...... | ....... | ............. |
| | प्रविष्टस्य | ...... | ....... | ............. |
| | मया | ...... | ....... | ............. |

३. अधोलिखितपदेषु सन्धि-विच्छेदं प्रदर्शयत —

| | पदम् | सन्धि-विच्छेदः |
|---|---|---|
| उदा. | प्रत्यपकारः | प्रति + अपकारः |
| | दायादैरुद्वेजितः | ..................... |
| | भूयोऽपि | ..................... |
| | अत्रैव | ..................... |
| | मैत्र्यर्थम् | ..................... |
| | तच्छ्रुत्वा | ..................... |
| | सर्पस्तेन | ..................... |

४. अधोलिखित-पदानाश्रित्य वाक्यनिर्माणं कुरुत —

| | पदम् | - | वाक्यम् |
|---|---|---|---|
| उदा. | कदाचित् | – | रामः कदाचित् मित्रैः रोषितः। |
| | कूपम् | – | ..................................... |
| | तत्र | – | ..................................... |
| | रिपवः | – | ..................................... |
| | सर्पेण | – | ..................................... |

५. अधोलिखितेषु समस्तपदेषु नामनिर्देशसहितं समासविग्रहो विधेयः —

| | पदम् | - | समास विग्रहः | समासनाम |
|---|---|---|---|---|
| उदा. | कृष्णसर्पः | – | कृष्णश्च असौ सर्पश्च | कर्मधारयः |
| | प्रियदर्शनः | – | ............................ | ................ |
| | पाषाणचयनिबद्धे | – | ............................ | ................ |
| | घट्टिकायन्त्रमार्गेण | – | ............................ | ................ |
| | व्याकुलमनाः | – | ............................ | ................ |
| | मण्डूकराजः | – | ............................ | ................ |

६. निम्नलिखितेषु पदेषु प्रकृति-प्रत्ययं प्रदर्शयत —

| | पदम् | धातुः ( प्रकृतिः ) | + | प्रत्ययः |
|---|---|---|---|---|
| उदा. | श्रुत्वा | श्रु | + | क्त्वा |
| | कर्त्तव्यः | ............. | + | ............. |
| | आहूतवान् | ............. | + | ............. |
| | उक्तम् | ............. | + | ............. |

७. अधोलिखितान् वाक्यान् अधीत्य प्रश्न-निर्माणं कुरुत —

उदा. वाक्यम्- गङ्गदत्तः कूपे प्रतिवसति स्म।

प्रश्नः- गङ्गदत्तः कुत्र प्रतिवसति स्म?

वाक्यम्- सः कदाचिद् दायादैः उद्वेजितः।

प्रश्नः- ................................................................

वाक्यम्- सः बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्।

प्रश्नः- ................................................................

वाक्यम्- सर्पोऽचिन्तयत्-‘‘अहं तावत् परिणतवयाः’’।

प्रश्नः- ................................................................

वाक्यम्- गङ्गदत्तः प्रियदर्शनमाह-‘‘केवलं यानहं दर्शयिष्यामि, त एव भक्षणीयाः।’’

प्रश्नः- ................................................................